# Indradyumnakritam 4 Vishnu Stotram

# इन्द्रद्युम्नकृतं ४ विष्णुस्तोत्रम्

## Document Information

Text title : Indradyumnakritam 4 Vishnu Stotram

File name : indradyumnakRRitaM4viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 17/119-130||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# इन्द्रद्युम्नकृतं ४ विष्णुस्तोत्रम्

इन्द्रद्युम्न उवाच ।
नमस्ते जगदाधार जगदात्मन्नमोऽस्तु ते ।
कैवल्यत्रिगुणातीत गुणाञ्जन नमोऽस्तु ते ॥ ११९॥

सुशुद्धनिर्मलज्ञानस्वरूपाय नमोऽस्तु ते ।
शब्दब्रह्माभिधानाय जगद्रूपाय ते नमः ॥ २.१७.१२०॥

संसारपतितश्रान्तदुःखध्वंस नमोऽस्तु ते ।
दुर्भेद्यहृदयग्रन्थिभेदकाय नमोऽस्तु ते ॥ १२१॥

द्विसप्तभुवनागारमूलस्तम्भाय ते नमः ।
ब्रह्माण्डकोटिघटनाशिल्पिने चक्रिणे नमः ॥ १२२॥

करुणामृतपाथोधिसुधाधाम्ने नमो नमः ।
दीनोद्धारैकगुह्याय कृपापाथोधये नमः ॥ १२३॥

प्रकाशकानां सूर्यादिज्योतिषां ज्योतिषे नमः ।
प्रतिस्वस्वनदीप्ताय अन्तःपापाग्नये नमः ॥ १२४॥

पावकाय पवित्राय पवित्राणां नमो नमः ।
गरिष्ठाय वरिष्ठाय द्राघिष्ठाय नमो नमः ॥ १२५॥

नेदिष्ठाय दविष्ठाय क्षोदिष्ठाय नमो नमः ।
वरेण्याय सुपुण्याय नारायण नमोऽस्तु ते ॥ १२६॥

परित्राहि जगन्नाथ दीनबन्धो नमोऽस्तु ते ।
निस्तीर्णोऽहं भवाम्भोधिं प्राप्य त्वां तरणिं सुखाम् ॥ १२७॥

त्वयि दृष्टे रमानाथ क्लेशा व्यपगता मम ।
चिदानन्दस्वरूपं त्वां प्राप्तानां दुःखसङ्क्षयः ॥ १२८॥

ध्रुवं नाथ समुत्पन्नपरमानन्दहेतुकम् ।

त्राहि त्राहि भवाम्भोधिमग्नं मां दीनचेतसम् ॥ १२९॥

मध्याह्नार्कोदिते व्योम्नि कुतः सन्तमसोदयः ।
ध्यानस्थितः स्तुवन्नेवं प्रणम्य जगदीश्वरम् ॥ २.१७.१३०॥

ध्यानावसाने स पुनः स्वयं जाग्रदबुध्यत ॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये
सप्तदशाध्यायान्तर्गतं इन्द्रद्युम्नकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय १७/११९-१३०॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 17/119-130..

Proofread by PSA Easwaran

*Indradyumnakritam 4 Vishnu Stotram*
pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*